श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री कम्भंचोक्कण्ण विरचितम्

# ॥ श्री चम्पकापुरीश्रीनिवासाष्टकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री चम्पकापुरीश्रीनिवासाष्टकम् ॥

शौभ्रराज राजराज कञ्जयोनि वन्दितं
नित्यभक्तपूजितं सुधन्वपूजकाञ्चितम्।
कञ्जचक्रकौस्तुभासिराजितं गदाधरं
चम्पकापुरीनिवासमानिवासमाश्रये ॥ 1 ॥

पन्नगारियायिनं सुपन्नगेशशायिनं
पङ्कजारिपङ्कजेष्टलोचनं चतुर्भुजम्।
पङ्कजातशोषकं विपङ्कजातपोषकं
चम्पकापुरीनिवासमानिवासमाश्रये ॥ 2 ॥

सर्वलोकनायकं सुवाञ्छितार्थदायकं
शर्वचापभञ्जकं सगर्वरावणान्तकम्।
पीतचेलधारकं कुचेलरिक्तदायकं
चम्पकापुरीनिवासमानिवासमाश्रये ॥ 3 ॥

नारदादिवन्दितं नृनारशैलभञ्जितं
नारसद्मवासजातनारपूर्वकायनम्।
नारतल्लजालयं कुनारकान्तकालयं
चम्पकापुरीनिवासमानिवासमाश्रये ॥ 4 ॥

कालमेघवर्णकं प्रकाममुक्तिदायकं
कालकालकारकं कुकालपाशदूरकम्।
रत्नवर्मराजवर्ष्मभानुवृन्दभास्करं
चम्पकापुरीनिवासमानिवासमाश्रये ॥ 5 ॥

sundarkidambi.com
prapatti dot com
sunder kidambi

दक्षशिक्षकच्छिदं कुहाटकाक्षसम्भिदं
    यक्षगीतसेवितं सुरक्षणैकदीक्षितम्।
अक्षजातमारकं कटाक्षदृष्टितारकं
    चम्पकापुरीनिवासमानिवासमाश्रये॥ 6॥

स्वर्णसूत्रगुम्फितोरुसालिकाश्ममालिकं
    रत्नरत्नरञ्जितं गदाञ्चितं कृपाकरम्।
प्रज्वलत्किरीटिनं प्रविस्फुरत्त्रिपुण्ड्रकं
    चम्पकापुरीनिवासमानिवासमाश्रये॥ 7॥

वक्रकान्तिवञ्चितोरुशारदेन्दुमण्डलं
    कुन्ददन्तमिन्दिरेशमक्षरं निरामयम्।
मन्दहासशुभ्रिताशकिङ्किणीलसत्कटं
    चम्पकापुरीनिवासमानिवासमाश्रये॥ 8॥

श्रीनिवासमष्टकम् भवाब्धिशोकशोषकं
    सर्वपापनाशकं सुपुत्रपौत्रदायकम्।
ये पठन्ति भक्तितः प्रयान्ति ते तु सर्वदा
    चम्पकापुरीनिवासमानिवाससन्निधिम्॥ 9॥

॥ इति श्री चम्पकापुरीश्रीनिवासाष्टकम् समाप्तम्॥

prapatti dot com sunder kidāmbi sunder kidāmbi